तत्र कृतौ[2] उपोद्घातम् आदौ प्रस्तूयते। इह काश्मीरविषये बोधिसत्त्वदेशीयो मुनीन्द्रप्रवचन[3]कृपापारावारीणमान्द्रो[4] महाकरुणाप्रगुणीकृतहृदयात्मा सर्व्वज्ञमित्रो नाम भिक्षुरभवत्। स चिन्तामणिरिवार्थिनां यथाभिलषितार्थसंपादनाद्दातृत्वेन जगति विख्यातः स्वयमेव स्वमर्थजातमर्थिभ्यो विसृज्य चीवरपात्रविभवो देशान्तरं व्रजन् वज्रमुकुटस्य राज्ञो विषयमगमत्। तत्र जराजर्जरीकृतं परित्यक्तपरिजनं द्विजमेकम् अध्वन्यपश्यत्। स कथाप्रसङ्गेन एवंविधवार्द्धकेऽपि क्व गन्तव्यं त्वयेति कृपयाकृष्टः सन्नाह [5]स्वसुतापरिणयनार्थमर्थमभ्यर्थयितुम्, अपि च सर्व्वज्ञमित्रस्य भिक्षोरन्तिकम्। अयं स्वविभवजातमर्थिभ्यो विभज्य स भिक्षुर्देशान्तरं[6] गत इति किं न श्रुतम्? इत्युक्तो वार्द्धकमुनिः सुचिरमभिनिःश्वस्य निश्चेष्ट इव मुहूर्त्तमवातिष्ठत। ततस्तमेवंविधं सकरुणमनुशोचन्तमेव सर्व्वज्ञमित्र इति समाश्वासयन्नुवाच। मैवमधीरो भव अहं ते सर्व्वमभिमतं सम्पादयिष्यामीत्युक्त्वा तमा-

१ Orig. चेषे।
२ Orig. वृतौ।
३ Orig. प्रवचना।
४ Orig. पान्द्रो।
५ Orig. सस्रुता।
६ Orig. भिक्षुर्जोर्देशान्तरं।

दाय वज्रमुकुटस्य नृपतेरन्तिकं सुवर्णेन समीकृत्य स्वशरीरं विक्रीय तन्मूल्यं तस्मै प्रदायानुनीय प्रस्थाप्य राज्ञः पुरतोऽवस्थितः। तस्मिंश्च समये तस्य राज्ञो यथोक्तविचित्रलक्षणोपेतपुरुषैकशतकर्त्तितमस्तकोपरिस्नानादभिमतं सेत्स्यतीत्युपदिष्टं केनापि। तद्वाक्यं महता कालेन यत्नतोऽन्विष्य सुवर्णसमतुलमेकोनशतं पुरुषाणां क्रीतमास्ते अनेनैकेन शतं परिपूर्णमतः कर्त्तितमस्तकोपरि स्नानं करिष्यामीत्यभिधाय एनं तन्मध्यं नय इत्यादिशति स्म। तदादिष्टभृत्येन तथैव सम्पादितम्। पश्चात्तमेकमवलोक्य सर्व्वे एव ते वध्यपुरुषाः प्रातर्मृता वयमिति उच्चैराक्रन्दन्तः साक्षान्मृत्युरयमुपस्थितो मुण्ड इत्यारटन्तो[1] बोधिसत्त्वेनाभिहिताः कस्मादेवमधीरता पूर्व्वमेवं ज्ञात्वैव किमात्मा विक्रीत इति। तत एतानतिकातरान् समाश्वास्य महाकरुणार्द्रया दृशा चावलोक्य मातरं विहाय नास्ति कश्चिदेषामन्यो निस्तारोपाय इति निश्चित्य संयतीभूय स सर्व्वज्ञमित्रो भगवतीमार्य्यतारां स्तोतुमारब्धवान्। तत्र श्लोककतिपयानन्तरं भगवती स्वयमागत्य यथाकर्त्तव्यमादिश्यानुचिन्तिता चाधितिष्ठन्त्यन्तर्हिता। ततः स लब्धवरः सर्व्वज्ञमित्रः युष्माभिः सर्व्वैः प्रातर्युगपदेव स्नातव्यमित्यादिष्टवान्। प्रातरागत्य राजपुरुषैस्ते वध्याः[2] सरस्तीरे नीताः सन्तस्तानभिहितवन्तः। सर्व्वैरस्माभिरेकदैव स्नातव्यं किं बहुविलम्बेन इत्युक्त्वा सरसि निमग्ना भगवतीप्रभावात् स्वं स्वं देशमुपजग्मुः। पश्चान्मुहूर्त्तद्वितयानन्तरं यत्नतो-

---

१ Orig. आरटतो। २ Orig. वध्यः सरस्तीरे।

ऽन्विष्टाः सन्तस्तैर्नोपलब्धाः[१] । तन्मूल्यसुवर्णं च यथास्वं राशीकृतं सरस्तीरे परमालोकितम् । ततस्ते राजपुरुषा भयविस्मयाकुलितमनसो राजनि तद्विज्ञापयामासुः । तच्छ्रुत्वा स राजा विस्मयावर्ज्जितमनास्तस्यैवैकस्य विक्रीतस्य भिक्षोरयं प्रभाव इत्यभिधाय सञ्जाताधिकतरप्रसादस्तमन्विष्यानीय तच्छिष्यतामुपगत इत्यादि कथा प्रसिद्धैव नोक्ता ।

श्रीदेव्यै नमः ।

॥ १ ॥ बालार्केत्यादि—

आर्य्ये तारिणि आपच्छरण्ये तव पादौ भक्त्या अभ्यर्च्चयामि इति सम्बन्धः । आरात् पापकेभ्यः कर्म्मभ्यः दूरं गतेत्यार्य्या । त्रिभवगताशेषदुःखार्णवाद् महाकरुणया सत्त्वांस्तारयतीति तारिणी । किंभूता ? आपच्छरण्या, आपत्सु अष्टमहाभयादिसकलतीव्रविपत्तिषु शरणार्हत्वाद् आपच्छरण्या, तस्याः सम्बोधनं हे आर्य्यतारिणि आपच्छरण्ये, तव भवत्याः पादौ चरणौ अभ्यर्च्चयामि कायवाङ्मनःप्रसादेन पूजयामि । अहं करपुटमुकुटाटोपभुग्नो[२]-त्तमाङ्गः सन्, करपुटं करद्वयबद्धाञ्जलिः स एव मुकुट इव मुकुटस्तस्याटोपो हर्षवेगस्तेन भुग्नं नम्रीभूतम् उत्तमाङ्गं शिरो यस्य स तथा । काभिः ? नवनुतिकुसुमस्रग्भिः, नवाः सद्योऽभिनिर्म्मिता या नुतयस्ता एव कुसुमानि पुष्पाणि तेषां स्रग्भिर्मालाभिः ।

---

१ Orig. र्नां नोपलब्धाः ।  २ Orig. भग्न ।

किंविशिष्टौ ? बालार्कालोकताम्रप्रवरसुरशिरश्चारुचूडामणिश्रीसम्पत्सम्पर्करागानतिचिररचितालक्तकव्यक्तभक्ती, बालोऽभिनवोदितो योऽर्कः सूर्य्यस्तस्यालोकोऽरुणावभासस्तद्वत्ताम्रा आरक्ताः प्रवराणां सुराणामिन्द्रादिदेवानां शिरःसु मस्तकेषु ये चारवो[1]ऽतिरुचिराश्चूडामणयः शिखाविन्यस्तरत्नानि तेषां श्रीसम्पत् शोभासमृद्धिस्तस्याः सम्पर्को मिलनं तेन यो रागो लौहित्यं तेन अनतिचिरम् अत्यल्पकालं रचिता निर्म्मिता अलक्तकस्य यावकस्य व्यक्ता अतिस्फुटा भक्तिः विचित्रयोजना ययोस्तौ। अनेन एतदुक्तं भवति हे मातस्त्वमेव आपच्छरण्या[2] तारिणी च अतो मां ह्यापत्पतितमुद्धर्त्तु[3]मर्हसीति कवेरभिप्रायः।

कथमहमापत्पतित इत्याह

**दुर्लङ्घे दुःखवह्नौ विनिपतिततनुर्दुर्भगः कान्दिशीकः**
**किं किं मूढः करोमीत्यसकृदपि कृतारम्भवैयर्थ्यखिन्नः।**
**श्रुत्वा भूयः परेभ्यः क्षतनयन इव व्योम्नि चन्द्रार्कलक्ष्मीम्**
**आलोकाशानिबद्धः परगतिगमनस्त्वां श्रये पापहन्त्रीम्॥ २॥**

॥ २॥ दुर्लङ्घे[4]त्यादि—

क्षतनयन इव चक्षुर्विहीन इव हे मातस्त्वां भगवतीं श्रये

---

१ Orig. चारवो अतिरुचिरा। २ Orig. आपच्छरण्ये।
३ Orig. मर्हस्मीति। ४ Orig. दुर्लङ्घ्ये।

संश्रयामि[1] । किं विशिष्टाम् ? पापहन्त्रीं पापानि दुरितानि हन्ति स्फुटयतीति । किम्भूतः ? परगतिगमनः परेषां रागादिक्लेशानाम् अधीना या देवादिषड्गतयस्तासु गमनं यस्य सोऽहम् । इत्थं गतोऽपि आलोकाशानिबद्धः । कथम् ? श्रुत्वा भूयः परेभ्यो व्योम्नि चन्द्रार्कलक्ष्मीम्[2], अहमप्येवंभूतोऽनेन कथमालोकयामीति कृत्वा अथ आलोकाय निभायनाय आशा अभिलाषस्तत्र निबद्धो नियतलग्नो यः स तथा । परेभ्यस्तद्गुणोद्गारिभ्यः श्रुत्वा भूयो वारंवारं समाकर्ण्य आकाशे चन्द्रार्कयोरिव लक्ष्मीं त्वद्गुणसम्पदम् । अन्धोऽपि किं न सुखी स्यादित्याह दुर्लङ्घे दुःखवह्नौ विनिपतिततनुः, दुःखमेव अतिदुःसहत्वाद्वह्निः अनलः दुःखेन अतिकष्टेन लङ्घयितुमतिक्रमितुं शक्यते इति दुर्लङ्घस्तत्र विनिपतिता निमग्ना तनुः शरीरं यस्य स तथा दुष्टो भगो ज्ञानं यस्य स दुर्भगो दुर्बुद्धिर्भाग्यरहित इत्यर्थः किं किं कर्त्तुमिच्छामीति कां कां दिशं गच्छामीति कृत्वा कान्दिशीको भयद्रुतः । पुनः कीदृशः ? किं किं मूढः करोमीत्यसकृदपि कृतारम्भवैयर्थ्यखिन्नः, मूढः स्वकार्य्येऽनभिज्ञः सन् किं किं करोमीति किं किमाचरामीत्यनेनाकारेणासकृदपि मुहुरपि कृतो विहितो य आरम्भ उद्योगस्तस्य वैयर्थ्येन नैष्फल्येन खिन्नः क्लिष्टः उद्विग्न इत्यर्थः चतनयनेऽपि एतद्विशेषणं यथासम्भवं योजनीयम् । इत्थं गतोऽपि अहं कथं नानुकम्प्य इति भावः ।

---

१ Orig. संश्रयमामि ।

२ Orig. चन्द्रार्कलक्ष्मः ।

कृपासामर्थ्यारम्भाभावात् कथमनुकम्पयतीत्याशङ्क्याह

सर्वस्मिन् सत्त्वमार्गे ननु तव करुणा निर्विशेषं प्रवृत्ता
तन्मध्ये तद्ग्रहेण ग्रहणमुपगतं मादृशस्याप्यवश्यम्।
सामर्थ्यं चाद्वितीयं सकलजगदघध्वान्ततिग्मांशु[१] विम्बं
दुःख्येवाहं तथापि प्रतपति धिगहो दुष्कृतं[२] दुर्विदग्धम्॥
३॥

॥ ३ ॥ सर्व्वस्मिन्निति—

ननु हे भगवति तव तावत् करुणा कृपा निर्विशेषम् अरिमित्रोदासीनसाधारणं यथा स्यात् तथा सर्व्वस्मिन् सत्त्वमार्गे अखिललोकवर्त्मनि[३] प्रवृत्ता सत्तारणैकनिष्ठा। अतस्तन्मध्ये सत्त्ववर्त्माभ्यन्तरे तद्ग्रहेण तेषां सत्त्वानां संग्रहेण मादृशस्यापि ग्रहणमवश्यं नियमेनोपगतमायातम्। न केवलं सकलजगत्साधारणैककरुणैव तव किन्तु सामर्थ्यं चाद्वितीयं[४] शक्तिरप्येकैव[५] अनन्यगामिनी। कीदृशम्? सकलजगदघध्वान्ततिग्मांशु[६]विम्बं, सकलस्य अखिलस्य जगतस्त्रिभवस्य यदघं कलुषं तदेव ध्वान्तं गाढ़ं[७] तमस्तत्तिग्मांशुविम्बसङ्काशमिव। अतोऽनन्यसाधारणयोः करुणासामर्थ्ययोर्विद्यमानयोरपि दुःख्येवाहं तथापीति न तवायम् अपराधः

१ B. तीग्मांशु।
२ B. दुःकृतं।
३ Orig. लोक व्रत्मनि।
४ Orig. चाद्वितीय।
५ Orig. प्येकैव।
६ Orig. तीग्मांशु।
७ Orig. वाढ़ं।

किन्तु प्रतपति धिगहो दुष्कृतं[1] दुर्विदग्धं, ममैव पूर्व्वार्ज्जितदुष्कृतमनुचितं दुर्विदग्धं दुष्परिपाकं[2] पीड़यति सन्तापयतीति धिगहो कष्टमाश्चर्य्यं। अनेनात्मनो मन्दभाग्यमावेदितमिति भावः।

पुनरपि सोत्कर्षगर्भामात्मनो निन्दामावेदयन्नाह

**धिग् धिग् मां मन्दभाग्यं दिवसकररुचाप्यप्रणुत्तान्धकारं**
**तृष्यन्तं कूलकच्छे हिमशकलशिलाशीतले हैमवत्याः।**
**रत्नद्वीपप्रतोल्या विपुलमणिगुहागेहगर्भे दरिद्रं**
**नाथीकृत्याप्यनाथं भगवति भवतीं सर्वलोकैकधात्रीम्॥ ४॥**

॥४॥ धिग्धिगित्यादि—

हे भगवति भवतीं सर्व्वलोकैकधात्रीं सर्व्वे अपर्य्यन्तलोकधातुस्थिता ये लोका जनास्तेषामद्वितीयामेकां धात्रीं परिपालिकां त्वां नाथीकृत्यापि शरणीकृत्यापि ऐश्वर्य्येण आश्रित्यापि अनाथमशरणमिति कृत्वा मन्दभाग्यमल्पपुण्यं मां धिग्धिगिति निन्दाभिधानम्। न केवलम् एवं दिवसकरस्य रवेः रुक् दीप्तिस्तयाप्यपरिमितजगदन्धतमोध्वंसिकया[3] अप्रणुत्तोऽनपगतोऽन्धकारो यस्य तं दिवसकरस्येव रुक् कान्तिर्यस्याः सा तया एवंभूतयापि त्वया अमेयकिरणया अज्ञानतमिस्रोत्सारिकयापि[4] अविनष्टाज्ञानान्धकारं, किञ्च हैमवत्याः सुरसरितः कूलकच्छे तीरप्रान्ते। कीदृशे?

---

१ Orig. दुःकृतं। २ Orig. दुःपरिपाकं।
३ Orig. जगदन्धं तमोध्वंसिकया। ४ Orig. तमिस्रौत्सारिकया।

हिमस्य तुषारस्य या शकलशिला खण्डशिला तद्वच्छीतले सर्व्व-क्लेशापहारिणि। तत्र निषस्समपि तृष्यन्तं पिपासाकुलम् उपगत-पिपासं तृषार्त्तमित्यर्थः। अथवा हैमवत्यास्तव अभयायाः सकल-सत्त्वाशेषभयविनाशिकायाः कूलकच्छे अनुकूल[१]भूम्येकदेशे निषस्स-मपि रागादिदोषाक्रान्तम्। कूलमनुकूलमुच्यते एकदेशे समुदायो[२] गम्यते इति न्यायात् यथा सत्यभामा इति। पुनः कीदृशम्? रत्नानां द्वीपे जलान्तर्मणिमयस्थलभूभागे या प्रतोली रथ्या तस्या विपुलमणिगुहैव गृहं वेश्म तद्गर्भे स्थितमपि दरिद्रम् अर्थ-हीनम्। अथवा बुद्धादिरत्नानां यत् स्थलं स द्वीपो भवशमयो-रन्तर्वर्त्तित्वात्तत्र या प्रतोली मोक्षद्वारं तस्या विपुलमणिगुहा महत्सुखस्थानं तदेव गेहं तद्गर्भे तदन्तर्वर्त्तिनि स्थाने[३]। एतज्ज्ञान-रत्नशून्यो महाकरुणासम्पन्नाया अपि भाग्यापराधान्न तवाहं विषय इति भावः।

स्वदोषोद्भावनव्याजेन कथं मां परिभाषसे इत्याशङ्क्याह

**मातापि स्तन्यहेतोर्विरुवति बहुशः खेदमायाति पुत्रे**
**क्रोधं धत्ते पितापि प्रतिदिवसमसत्प्रार्थनासु प्रयुक्तः।**
**त्वं तु त्रैलोक्यवाञ्छाविपुलफलमहाकल्पवृक्षाग्रवल्ली**
**सर्वेभ्योऽभ्यर्थितार्थान् विसृजसि न च ते विक्रिया[४] जातु काचित्॥ ५॥**

---

१ Orig. अनुकूत। २ Orig. समूदाया।
३ Orig. नंदरि। ४ A. विक्रया।

॥५॥ मातापीत्यादि—

हे परमचान्तिसम्पन्ने पित्रोरपि अधिकतरा त्वम् । कथम् ? मातापि पुत्रे तनये स्तन्यहेतोर्दुग्धनिमित्तं बहुधा अतिरुदति आक्रन्दति सति खेदमायाति विषादमुपैति । जनकोऽपि असत्प्रार्थनासु असन्त्यः असम्भाविन्यः[१] या वस्तुनो वाञ्छास्तासु प्रयुक्तः प्रतिदिवसं प्रतिप्रेरितः सन् क्रोधं धत्ते कोपमुद्वहति । त्वं तु भगवती पुनः, अतिस्नेहवती, सर्व्वेभ्योऽपरिमितजनेभ्योऽभ्यर्थिता सती अर्थान् यथाभिलषितवस्तूनि विसृजसि परित्यजसि । कथं विसृजसि इत्याशङ्क्य आह । त्रैलोक्यानां त्रैधातुकान्तर्वर्त्तिनां सत्त्वानां वाञ्छाया विपुलं महत्फलं यस्याः सा चासौ, महाकल्पवृक्षस्य उत्तमवाञ्छातरोरग्रवल्ली च या सा तथा प्रधानमञ्जरीव त्वमित्यर्थः । अतस्त्वैभववदान्याया महाकरुणार्द्रीकृतहृदयायाः अत्यल्पमपि अन्यथात्वं विकारभावो न च नैव जातु कदाचिदपि । एतेन आर्त्तानां परुषाभिधानेऽपि भवती न परिखिद्यते इति भावः ।

किञ्च पूर्व्वकृतप्रतिज्ञामपि भगवत्याः स्मारयन्नाह

**यो यः क्लेशौघ[२]वह्निज्वलिततनुरहं तारणी तस्य तस्येत्यात्मोपज्ञं[३] प्रतिज्ञां कुरु मयि सफलां दुःखपातालमग्ने ।**
**वर्धन्ते यावदन्ते परुषपरिभवाः प्राणिनां दुःखवेगाः**
**सम्यक्संबुद्धयाने प्रणिधिधृतधियां[४] तावदेवानुकम्पा[५] ॥६॥**

---

१ Orig. असंतो संभवनिनोघे वस्तुनोयं चास्तासु ।

२ A. क्लेशोघ ।　३ A. आत्मोपज्ञां ।

४ A. धृतिधियां ।　५ A. अनुकम्पा ।

॥६॥ यो य इत्यादि—

हे सत्यवत्सले त्वया पूर्व्वमात्मोपज्ञं कृता या[1] प्रतिज्ञा अवश्य-पाल[2]नीया। आत्मनः स्वस्या उपज्ञम् अनुरूपं यथा स्यादिति क्रियाया विशेषणम्। तां मयि अपि दुःखपातालमग्ने दुःखमेव अतिगाधत्वात् पातालमिव तत्र मग्ने निःशेषेण तलं गते सफलां संपूर्णां कुरु निष्पादय। कां ताम्? यो य इति वीप्सायाम्। क्लेशानां रागादीनाम् ओघो निवहः स एव अतिदाहकत्वाद् वह्निर्हुताशनः तेन प्रज्वलिता प्रदीप्ता तनुः कायो यस्य तस्याहं तारिणी निस्तारिकेत्येव। अर्थान्तरन्यासव्याजेन भगवतीमेव उत्क-र्षयन्नाह वर्द्धन्ते इति। प्राणिनामेते पुरोवर्त्तिनो दुःखवेगानां प्रवाहाः। किम्भूताः? परुषपरिभवाः परुषोऽतिनिष्ठुरः परिभवस्तिर-स्कारो येषु ते तथा। वर्द्धन्ते वृद्धिमुपयान्ति यावत्तावदेतत्-पर्य्यन्तमेव अनुकम्पा महाकरुणा। केषां सम्यक्सम्बुद्धयाने सुगत-महावर्त्मनि[3] प्रणिधिर्बोधिचित्तम् उत्पाद्य निखिलत्रिजगदुद्धरणाय उद्योगः प्रस्थानचित्तं तत्र धृता निहिता बुद्धिः प्रज्ञा यैस्तेषाम्। एतेन एतदुक्तं यावद्यावद् भवदुःखवृद्धिस्तावद्भवद्विधानां परार्थ-परायणानां महाकरुणापि वर्द्धते। अतो[4] न मामुपेक्षितु-मर्हसीति भावः।

देव्याः स्वदुःखमावेद्यापि कदाचिद्वृत्तं मामावेदितवत्सलं च आवेद्य उपेक्षते इत्यालोच्य पुनः फुत्कारयन्नाह

---

१ Orig. कृतया। २ Orig. वाल।

३ Orig. महाव्रत्मनि ४ Orig. त्यतो।

इत्युच्चैरूर्द्धबाहौ नदति नुतिपदव्याजमाक्रन्दनादं
नार्हत्यन्योऽप्युपेक्षां[1] जननि जनयितुं किम्पुनर्यादृशी
त्वम्।
त्वत्तः पश्यन् परेषामभिमतविभवप्रार्थनां प्राप्तुकामो
दह्योऽसह्येन भूयस्तरमरतिभुवा सन्तातान्तर्ज्वरेण ॥ ७॥

॥७॥ इत्युच्चैरूर्द्धबाहाविति—

हे जननि अन्योऽपि अदयालुः प्रार्थ्यते, अपि इत्यनेन प्रागुक्ताभिलाषप्रकारेण उच्चैरधिकतरम् ऊर्द्धबाहौ नदति ऊर्द्धम् उपरि बाहू भुजौ यस्य तस्मिन् उत्क्षिप्तभुजे विरुवति जने आक्रन्दनादं यथा भवति इति क्रियाविशेषणम्। आ उच्चैः क्रन्देन भयविक्लवप्रलापेन नादोऽत्युच्चध्वनिर्यत्र नदने तमेव पुष्णाति। नुतिपदव्याजं नुतेः पदं शब्दः[2] वाक्यं वा तन्मिषं। उपेक्षाम् अवज्ञाम् अवहेलां जनयितुम् उत्पादयितुं नार्हति नोचितकारी भवति। किं पुनः इत्याश्चर्याभिधानमतिशयेनेत्यर्थः। दशदिग्लोकधात्ववस्थितनिखिलजनातिदुःसहदुःखानलपरित्राणकारणाध्येषणपरायणा तन्निवारणाय करुणागुणरमणीयान्तःकरणा त्वमीदृशी माता। किञ्च त्वत्तः पश्यन् परेषां त्वत्तो भवत्याः सकाशात् परेषां त्वद्भक्तिपरायणानाम् अन्येषामभिमतविभवप्रार्थनां प्राप्तुकामः पश्यन् अवलोकयन् भूयस्तरम् अतिशयेन अहं दह्ये प्रज्वलितो भवामि। अभिमता अभिलषिता ये विभवा लौकिकलोकोत्तराः श्रियस्तेषां प्रार्थना याञ्चा[3] ताम्।

---

[1] नार्हत्यं न्योप्युपेक्षां। [2] Orig. omit :। [3] Orig. यांचा।

यद्वा प्राप्तः सिद्धः काम इच्छा यस्य। केन? सन्तताऽन्तर्ज्वरेण सन्ततं निरन्तरं योऽन्तर्मनसि ज्वरो दुःसहतापस्तेन। अरतिभुवा अरतेर-सुखाद् भवति उत्पद्यते यस्तेन असह्येन अतिदुःसहेन। सकलजन-मनोऽभिलाषसम्पादिका व्याक्रन्दत्यपि मयि न तुष्यसीति धिग् दैवमित्यभिप्रायः।

अधार्म्मिकं[१] नाम आकलयसि इत्याशङ्क्य आह

**पापी यद्यस्मि कस्मात् त्वयि मम महती वर्द्धते भक्तिरेषा**
**श्रुत्या[२] स्मृत्या च नाम्नाप्यपहरसि हठात् पापमेका त्वमेव।**
**त्यक्तव्यापारभारा तदसि मयि कथं कथ्यतां तथ्यकथ्ये**
**पथ्यं ग्लाने मरिष्यत्यपि विपुलकृपः किं भिषग् रोरु-धीति॥ ८॥**

॥ ८॥ पापीत्यादि—

पापी यद्यस्मि भवामि, कस्मात् किमर्थं त्वयि अनिर्व्वचनीय-माहात्म्यायां मम पापकारिणो भक्तिः श्रद्धैषा पुरःपरिवर्त्तिनी स्तुत्यादिरूपा महती सातिरेका सती[३] वर्द्धते वृद्धिमुपैति। नहि उपचितकुशलमूलस्य त्वच्चरणेऽभिप्रसादोऽतोऽनुमीयते नाहमपुण्य-वान्। अपरञ्च[४] त्वमेव परम् एका अद्वितीया कलुषेन्धनदहना-त्मिका पापमपहरसि स्फोटयसि हठात् बलात्। कया? श्रुत्या

---

१ Orig. अधर्म्मिकं। २ A. श्रुत्वा।
३ Orig. साता। ४ Orig. अपरञ्चा।

अनुपदमाकर्णनेन, स्मृत्या पुनःपुनर्मनसि भावनयापि नाम्नापि तारेति संज्ञाघोषणेनापि। सकलजनानाम्, अखिलतीव्रकलुषशैलाशनिस्त्व-महमपि नातिमन्दपुण्य इत्यर्थः। मयि त्यक्तव्यापारभारा, तदसि मयि कथं त्यक्त उज्झितो व्यापारस्य भवदुःखोद्धरणलक्षणस्य भारो गुरुत्वं यया सा, तथा लक्षरणशरणेऽपि मयि कस्माद्धेतोरसि तदसि तत् कथ्यतां तथ्यकथ्ये सत्यवादिनि, तच्छब्दोऽव्ययस्तस्मादर्थे तस्मा-दभिधीयता[1]मिति, तथ्यमवितथं कथ्यं वचनं यस्याः सा। उक्त-मपि अर्थम् अर्थान्तरन्यासेन द्योतयन्नाह। पथ्यं ग्लाने मरिष्य-त्यपि म्रियमाणेऽपि रोगिणि पथ्यमौषधं विपुलकृपो महादया-र्द्रमना भिषक् वैद्यः किं रोरुधीति किं निवारयति नैवेत्यर्थः। एतेनैतदुक्तं रागादिरोगसङ्कुले दुश्चिकित्सितत्वा[2]दमृतलक्षणं पथ्यं दातुमर्हसीति भावः॥

अस्वतन्त्रतया भगवतीपदं कमलाराधनावकाशं[3] प्रकाशयन् प्रागुक्तं कार्पण्याभिधानावैयर्थ्यं च विज्ञापयन्नाह

**मायामात्सर्य्यमानप्रभृतिभिरधमैस्तुल्यकालं क्रमाच्च**
**स्वैर्दोषैर्वाह्यमानो मठकरभ[4] इवानेकसाधारणांशः[5]।**
**युष्मत्पादाब्जपूजां क्षणमपि न लभे यत्तदर्थं विशेषाद्**
**एषा कार्पण्यदीनाक्षरपदरचना स्यान्ममावन्ध्यकामा॥८॥**

---

१ Orig. अभिधायताम्। २ Orig. दुश्चिकित्सितत्वाम्टत।

३ Orig. कमलाराधनानुवकासं।

४ B. कर। ५ B. साधारणांसः।

॥ ९ ॥ मायेत्यादि—

युष्मत्पादाब्जपूजां तव चरणसरोजसपर्य्यां क्षणमपि न लभे मनागपि न साधयामि। कुतः? स्वैर्दोषैस्तुल्यकालं क्रमाच्च वाह्यमानः, स्वैरात्मीयैर्दोषैरपराधैः समकालं यथा येन युज्यमानः। कीदृशोऽहम्? अनेकसाधारणांशः अनेकेषां बहूनां साधारणस्तुल्यः अंशः भागः यस्य सः। तथा क इव? मठकरभ इव विहारोष्ट्र इव। किं स्वरूपैः? माया अविद्या, मत्सकाशात् सरतु इति मत्सरस्तस्य भावो मात्सर्य्यं, माया तु कामनालक्षणा तृष्णा, मानश्चित्तसमुन्नतिः स च सप्तविधः। त एव प्रभृतयः प्रकारा येषां तैः। अधमैर्वराकैः प्रज्ञादृष्टिमात्रमावर्त्तयन्। यत्तदर्थे यद् यस्मादित्यर्थः। अहं[1] परप्रेष्योऽतो विशेषादेषा कार्पण्यदीनाक्षरपदरचना एषा [2]स्वदुःखाविष्करणरूपा। कृपणस्य वराकस्य अतिदुर्गतस्य भावः कार्पण्यं तस्माद्दीनमतिकातरं परुषम् अक्षरं येषु तेषां पदानां शब्दानां रचना ग्रथना। ममावन्ध्यकामा स्यात्तदर्थविशेषात् पुनःपुनर्विज्ञापयामीति वाक्यशेषः। अवन्ध्योऽनिष्फलः[3] कामोऽभिलाषो यत्र सा तथा। विशेषादतिशयेन फलवती यथा स्यादिति वा योज्या। मायामात्सर्य्यमानक्लेशादिस्तं[4] निर्जित्य त्वत्पदारविन्दाराधनैकपरो यथा स्यां तद्विधेहीत्याशयः।

दुःखमावेद्य इदानीं प्रभावातिशयद्वारेण भगवतीं स्तुवन् आदौ अष्टमहाभयापहरणशक्तिम् अष्टश्लोकेनाह

---

[1] Orig. महं?
[2] Orig. स्वदुःखाविःकरणरूपा।
[3] Orig. अनिःफलः।
[4] Orig. क्लेशारिस्तं।

कल्पान्तोद्भ्रान्त[१]वातभ्रमितजलचलल्लोलकल्लोलहेला-
संक्षोभोत्[२]क्षिप्तवेलातटविकटचटत्[३]स्फोटमोट्टाट्टहासा-
त् ।
मज्जद्भि[४]र्भिन्ननौकैः सकरुणरुदिताक्रन्दनिस्पन्दमन्दैः[५]
स्वच्छन्दं देवि सद्यस्त्वदभिनुतिपरैस्तीरमुत्तीर्य्यते ऽब्धेः[६] ॥
१० ॥

॥ १० ॥ कल्पान्तेत्यादि—

हे देवि त्वदभिनुतिपरैरुत्तीर्य्यते अब्धेस्तीरं महासमुद्रात् पारमासाद्यते । सद्यस्तत्क्षणादेव । स्वच्छन्दमपराधीनं यथा स्यात् तवाभितः सर्व्वतो नुतिरेव परा प्रधाना येषां तैः । भिन्ना विदीर्णा नौका तरिर्येषां तैः । मज्जद्भिस्तलं प्रविशद्भिः । कीदृशैः ? सकरुणेन हृदयद्राविणा अतिदीनेन यद् रुदितं तेन च आक्रन्दनाद् तुमुलध्वनिस्तेन ये निस्पन्दाश्चेष्टाशून्या इव मन्दा मृता वयं सर्व्वे इत्यनुत्साहा ये तैः । किम्भूतात् ? कल्पान्तः प्रलयः तत्र उद्भ्रान्तः समुत्थित इव यो वातः समीरणस्तेन भ्रमितानि आवर्त्तीकृतानि यानि जलानि तेषां ये चलन्तः समुद्गच्छन्तो लोलाः कम्पमानाः[७] कल्लोलास्तरङ्गास्तेषां हेलया विलासेन यः संक्षोभो विकलता तस्माद् उत्क्षिप्त उल्लङ्घितो वेलातटो मर्य्यादाभूमिस्तत्र

१ कल्पान्तोत्भ्रान्त ।
२ A. संक्षोभोत्क्षिप्त ।
३ A. चटास्फोटसुक्ताट्टहासात् ।
४ A. मज्जत्भि ।
५ A. रुदितैः क्रन्दनिष्पन्नमन्दैः ।
६ A. ते ऽब्धे ।
७ Orig. adds. उत्तमा धनामीभूता ।

यो विकटचटत्स्फोटो भीमनादः स एव मोट्टः प्रौढ़ोऽट्टहासो विकृतोच्चैःशब्देन प्रहसनमिव यस्य तस्मात्। चटदित्यनुकरणध्वनिः।

जलमभिधाय अग्निमाह

धूमभ्रान्ताभ्रगर्भोद्भवगगनगृहोत्सङ्गलिङ्गत्[१]स्फुलिङ्ग-
स्फूर्जज्ज्वाला[२]करालज्वलनजवविशद्वेश्म[३]विश्रान्तशय्याः।
त्वय्याबद्धप्रणामाञ्जलिपुटमुकुटा गद्गदोद्गीतयाच्ञाः[४]
प्रोद्यद्विद्युद्विलासोज्ज्वलजलदजवैराव्रियन्ते[५] क्षणेन॥११॥

॥११॥ धूमेत्यादि—

हे परपरित्राणपरायणे त्वयि आबद्धप्रणामाञ्जलिपुटमुकुटा आव्रियन्ते क्षणेन सन्नह्यन्ते त्वरया परित्रायन्ते इति यावत्। कैः? प्रोद्यतीनां प्रकर्षेण उद्भवन्तीनां विद्युतां यो विलासः क्रीड़ा तेन उज्ज्वलाः[६] अवभासयन्तो ये मेघा जलमुचः तेषां जवैरतिवेगैः। त्वयि मातः यो बद्धः प्रणामाञ्जलिपुटमेव मुकुटः किरीटो यैस्ते। गद्गदेन अव्यक्ताक्षरेण उद्गीता अभिहिता याच्ञा[७] मां निस्तारयेति प्रार्थना यैस्ते। पुनः किम्भूताः? धूमानां भ्रान्तं भ्रमणं यत्तदेव अभ्राणि जलदास्तेषां गर्भः सन्धिः सङ्घट्टनं तस्मादुद्भवः प्रादुर्भावो यस्य तदेव गगनं नभस्तदेव गृहं[८] तस्योत्सङ्गे क्रोड़े लिङ्गन्त[९]स्तर-

---

१ A. रङ्ग। २ A. स्फूर्जज्ज्वाला। ३ A. विसद्वश्म।
४ Orig. यांचाः। ५ Orig. वृयन्ते।
६ Orig. उज्वलाः। ७ Orig. यांचा। ८ Orig. प्रादुर्भावो गगनं नभस्तस्य यस्य गृहस्य। ९ Orig. रिंगतः।

ज्ज्वन्तो ये स्फुलिङ्गाः अग्नेः कणास्तैः[१] स्फुरन्य इतस्ततो लहलहायन्त्यो या ज्वालाः शिखास्ताभिः करालोऽतिभीषणो यो ज्वलनोऽनलस्तेन जवेन विशन्तः अभ्यन्तरं[२] परिभ्रमन्तः वेश्मनि[३] शय्यायां विश्रान्ताः सुखासीना ये ते तथा। इहतु क्तान्तस्य पूर्व्वनिपातः गतग्रामो भृत्यो यथा।

करिणं निगदितुमाह

**दानाम्भःपूर्य्यमाणो[४]भयकटकटकालम्बिलोलम्ब[५]माला
ह्लङ्कारा[६]ह्लयमानप्रतिगजजनितद्वेषवह्ने[७]र्द्विपस्य।
दन्तान्तोत्तुङ्गदोलातलतुलित[८]तनुस्त्वामनुस्मृत्य मृत्युं
प्रत्याचष्टे प्रहृष्टः पृथुशिखर[९]शिरःकोटिकोट्टोपविष्टः[१०]
॥ १२ ॥**

॥ १२ ॥ दानाम्भ इत्यादि—

हे दुर्गोत्तारिणि त्वाम् अनुस्मृत्य मृत्युं प्रत्याचष्टे भवतीं हृदि विभाव्य मरणं प्रतिक्षिपति। दन्तान्तो दशनाग्रं स एव उत्तुङ्गम् उन्नतं[११] दोलातलं प्रेङ्खस्वरूपं हिन्दोलेति प्रसिद्धं तत्र तुलिता[१२] तुलीकृता तनुः शरीरं यस्य स तथा। कीदृशः ? पृथुशिखरो[१३]

१ Orig. omits : ।　　२ Orig. omits ं ।
३ Orig. यत्र वेश्मनि तत्र ।　　४ A, B. पूर्य्यमानो ।
५ A. रोलम्ब ।　　६ A. ठुङ्कार ।
७ A. द्वेषवह्ने द्विपस्य　　८ A. तुलित ।　　९ B. शिषर ।
१० A. कोटोपविष्ठ ।　　११ Orig. omits ं ।
१२ Orig. तुलिमालीकृता ।　　१३ Orig. शिषरो ।

त्रिपुलाचलमस्तक इव शिरोऽर्थात् तस्यैव दन्तिनः कुम्भस्थलं तस्य कोटिरग्रं सैव कोट्टाङ्गस्थानमिव तत्र उपविष्टो निषण्णो यः स तथा। प्रहृष्टोऽत्यानन्दितः सन्। कस्य? द्विपस्य करिणः। किम्भूतस्य? दानाम्भो मदजलं तेन पूर्य्यमाणः सम्भूयमानः उभयकटः सव्येतर-गण्डस्थलं स एव कटका गिरेरधोभूरिव अतिविस्तीर्णत्वात् तत्र आलम्बिनां लोलम्बानां भ्रमराणां या माला पङ्क्तिस्तस्या हुङ्कारो मञ्जुगुञ्जध्वनिस्तेन आह्वयमानाः सम्मुखीक्रियमाणा ये प्रतिगजा विपक्षदन्तिनः तैर्जनित उत्पादितो द्वेष एव वह्निः अनलो यस्य तस्य॥

चौरानभिधातुमाह

**प्रौढ़प्रासप्रहारप्रहतनरशिरःशूलवल्गुत्सवायां[1]**
**शून्याटव्यां कराग्र[2]ग्रहविलसदसिस्फोटकस्फीत[3]दर्पान्।**
**दस्यून् दास्ये नियुङ्क्ते[4] सभ्रुकुटिकुटिलभ्रूकटाक्षेक्षिताक्षां**
**श्चिन्तालेखन्यखिन्नस्फुटलिखितपदं नाम धाम श्रियान्ते**
**॥ १३ ॥**

॥ १३ ॥ प्रौढ़ेत्यादि—

हे अभयप्रदे ते तव नाम तारे प्रतारेत्यभिधानम्। दस्यून् दास्ये नियुङ्क्ते चौरान् भृत्यत्वे नियोजयति। कीदृशम्? श्रियां धाम निखिल[5]सम्पदामालयः। पुनः कीदृशम्? चिन्ता सङ्कल्पः

---

१ A. शूलल्युत्सवायां। २ B. omits one ग्र। ३ B. स्फोट।
४ A. नियत्ते। ५ Orig. निखि।

मेव लेखनी आलेख्यकाष्ठी तया अखिन्नेन अनायासेन स्फुटम् अतिव्यक्तं लिखितं विन्यस्तं पदं यत्र तत् तथा। किं विशिष्टान्? भ्रुकुटिः परभीषणो य उच्चैर्ललाटसङ्कोचस्तया सह वर्त्तते कुटिले भङ्गुरे ये भ्रुवौ ताभ्यां कटाक्षेण ईक्षितं तिर्य्यग्वलितेन आलोकितं ययोस्ते तथा तादृशे अक्षे चक्षुषी येषां तान्। कीदृशान्? कराग्रग्रहेण मुष्टिनिष्पीड़नेन विलसन्तः सकम्पजलजलायमाना ये अतिस्फोटकाः खड्गाग्रधारास्तैः स्फीतोऽतिप्रौढ़ो दर्पोऽहङ्कारो येषां तान्। कस्याम्? शून्याटव्याम् शून्या निर्जना या अटवी कान्तारं तस्याम्। किम्भूतायाम्? प्रौढ़ो यः प्रासप्रहारोऽतिनिष्ठुरकुन्ताघातस्तेन प्रहता ये नरास्तेषां शिरःसु कपालेषु याः शूलवल्ल्यः शूलयष्टयः ताभिः तासां वा उत्सवो मङ्गलं हर्षो वा यस्यां यत्र वा तस्याम्।

सिंहं कथयितुमाह

**वज्रक्रूरप्रहारप्रखरनख[१]मुखोत्खातमत्तेभकुम्भ-**
**श्चोतत्सान्द्रास्रधौतस्फुटविकटसटासङ्कटस्कन्धसन्धिः[२]।**
**क्रुध्यन्ना[३]पित्सुराराादुपरिमृगरिपुस्तीक्ष्णदंष्ट्रोत्कटास्य-**
**स्त्रस्यन्नावृत्य याति त्वदुचितरचितस्तोत्रदिग्धार्थ-**
**वाचः[४] ॥ १४ ॥**

---

१ A. शाख।　　　　२ A. सन्धिः।
३ A. क्रुध्येन्ना।　　　　४ A. स्तोत्रदृग्धार्थवाचः।

॥ १४ ॥ वज्रेत्यादि—

हे सकलजनवत्सले मृगरिपुस्त्रस्यन्नावृत्य याति। मृगाः करिणः पशवो वा तेषां रिपुः सिंहस्त्रस्यन् भयमावहन् आवृत्य व्यापाराद् दूरं पलायते। कुतः? त्वय्येव उचितम् अनुरूपं रचितं निष्पादितं यत् स्तोत्रं तेन दिग्धो विलिप्तोऽर्थो यस्याः एवंविधाया वाचो वचनादर्थात् पुरुषस्येति। कीदृशः? तीक्ष्णदंष्ट्रया उत्कटं भीषणम् आस्यं मुखं यस्य सः। तथा उपयुद्धे क्रुध्यन् रोषं कुर्व्वन्, आपित्सुः आपतितुमिच्छुः। किम्भूतः? वज्रवत् क्रूरप्रहाराणि प्रखराणि तीक्ष्णानि नखानां मुखानि अग्रभागास्तैरुत्खाताः उत्कीर्णा मत्तानाम् इभानां कुम्भिनां ये कुम्भाः शिरोदेशास्तेषु श्चोतन्ति स्रवन्ति सान्द्राणि घनानि यानि असृञ्जि रुधिराणि तैर्धौताः प्रक्षालिताः स्फुटविकटा अत्यन्तभीषणा याः सटाः केशरास्ताभिः सङ्कटः स्कन्धस्य धमनेः सन्धिरन्तरालं यस्य स तथा।

फणिनं वक्तुमाह

धूमावर्त्तान्धकाराकृतिविकृतफणिस्फारफुत्कारपूर-
व्यापारव्यात्तवक्त्रस्फुरदुरुरसनारज्जुकीनाशपाशैः।
पापात् सम्भूय भूयस्तव गुणगणनातत्परस्त्वत्परात्मा
धत्ते मत्तालिमालावलयकुवलयस्रग्विभूषां विभूतिम् ॥
१५ ॥

॥ १५ ॥ धूमेत्यादि—

हे विपद्गतजनोद्वीक्षणपरे त्वत्परात्मा भूयः पुनर्विभूतिं सम्पदं

धत्ते बिभर्त्तीति सम्बन्धः। त्वमेव परं केवलम् आत्मा यस्य स तथा। कीदृशः? तत्र गुणानामणिमलघिमादीनां गणना संख्या तत्र तत्परस्तन्निष्ठः। कीदृशीम्? मत्तालीनां हर्षोद्विदद्विरेफाणां[१] या माला तस्या वलयो वेष्टनं यस्याः कुवलयस्रजः नीलोत्पलमालायाः सैव विभूषा अलङ्कारो यस्यास्ताम्[२]। भगवतीप्रभावात् स एव उरगस्तथाविधो जात इति भावः। पापाद् अधर्म्मात् सम्भूय आसाद्य। कैः? धूमानामावर्त्तः परिमण्डलं यत्रान्धकारे तच्चाकृति-राकारो यस्य तस्य विकृतस्य भयानकस्य फणिनः सर्पस्य स्फारोऽति-महान् फुत्कारपूरस्फूत्कृतिसमूहस्तस्य यो व्यापारः क्रिया तेन व्यात्तं यद्वक्त्रं आस्यं तत्र स्फुरन्त्यौ लेलिहायमाने गुर्व्यौ गुरुतरे ये रसने जिह्वे त एव रज्जवो वरत्रास्तन्मया एव कीनाशस्य कृतान्तस्य पाशा इव पाशास्तैः।

बन्धनमभिधातुमाह

**भर्त्तृभ्रूभेदभीतोद्भट[३] कटकभटाकृष्टदुःश्लिष्टकेश-**
**श्वञ्चद्दा[४]चाटचेटोत्कटरटितकटु[५]ग्रन्थिपाशोपगूढः।**
**क्षुत्तृट्क्षामोष्ठकण्ठस्त्यजति स सपदि व्यापदं तां दुरन्तां**
**यो यायादार्य्यताराचरणशरणतां स्निग्धबन्धूज्झितोऽपि॥**
**१६॥**

---

१ Orig. द्विरेफानां।

२ Orig. adds एवंविधा स्रगेव विभूषा तस्य विभूषा शोभा तामिति समस्तं वा पदम्।

३ A. भीतोत्भट।

४ A. चञ्चद।

५ A. पट्ट।

॥ १६ ॥ भर्त्तृभ्रू इत्यादि—

हे अशेषबन्धविध्वंसिनि, यः पुमान् यायात् गच्छेत् आर्य्य-तारायाः चरणमेव शरणं त्राणं तस्य भावस्तत्त्राणताम्। स्निग्ध-बन्धूज्झितोऽपि स्निग्धाः प्रेमार्द्रीकृतमनसो ये बन्धवो मित्राणि तैः उज्झितोऽपि मन्यक्त एव सन्। ताम् अनुभूतां व्यापदं विपत्तिं दुरन्तां दुःसहोऽन्तोऽवसानं यस्यास्तां सद्यस्तत्क्षणादेव त्यजति प्रति-क्षिपति दूरीकरोतीत्यर्थः। कीदृशः? भर्त्तुः प्रभोः भ्रूभेदो भ्रकुटिः[१] भ्रुवो भङ्गुरता तस्माद् भीतास्त्रस्ता उद्भटाः प्रसिद्धाः कटके ये भटाः राजधान्यां प्रेष्यवीरास्तैराकृष्टाः उच्चैर्निष्पीड्या[२] दुःश्लिष्टा[३] इतस्ततीकृताः केशा यस्य स तथा। किम्भूतः? चञ्चन्तः इतस्ततः परिभ्रमन्तो वाचाटाः वावदूका बहुवल्गिनो ये चेटा दासास्तेषां यदुत्कटं रटितम् असह्यं प्रलपितं तेन कटुग्रन्थिस्तीव्रबन्धो येषु पाशेषु तैरुपगूढ़ः सुबद्धः स तथा। क्षुद्[४]बुभुक्षा तृट् पिपासा ताभ्यां क्षामः शुष्क ओष्ठाभ्यां सह कण्ठो यस्य स तथा।

रक्षोऽभिधातुमाह

**मायानिर्माणकर्म्मक्रमकृतविकृतानेकनेपथ्यमिथ्या-**
**रूपारम्भानुरूपप्रहरणकिरणाडम्बरोड्डामराणि[५]।**

---

१ Orig. omits :।   २ Orig. निःपीड्या।

३ Orig. adds नीता before it.   ४ Orig. क्षत्।

५ A. डामरो डामराणि।

त्वत्तन्त्रोद्धार्य्यमन्त्रस्मृतिहृतदुरितस्यावहन्त्यप्रधृष्यां
प्रेतप्रोतान्त्रतन्त्रीनिचयविरचितस्रज्जि रक्षांसि रक्षाम्[1] ॥
१७ ॥

॥ १७ ॥ मायेत्यादि—

हे महाप्रभावे रक्षांसि राक्षसाः अप्रधृष्यां शत्रुभिरनभिगम्यां रक्षाम् आवहन्ति विदधति। कस्य ? तव तारार्णवादीनि तन्त्राणि तेषु उद्धार्य्या उत्तोलनीया ये मन्त्रास्तेषां स्मृत्या स्मरणेन हृतानि दुरितानि पापानि यस्य तस्य। कीदृशानि ? प्रेतानां शवानां प्रोत उत्खातः अन्त्रतन्त्रीनिचयः अन्त्रगुणनिवहस्तेन विरचिता निर्म्मिता स्रग् माला यैस्तानि। मायया छद्मना निर्म्मितानामनुपमवीरबीभत्सादिरूपादीनां कर्म्मक्रमः करणस्य परिपाटिस्तेन कृतं निष्पादितं विकृतम् अतिरौद्रम अनेकरङ्गविषयं नेपथ्यं प्रसाधनं तदेव मिथ्यारूपं तेषु अलीकाकारेषु य आरम्भो दर्पस्तस्यानुरूपाणि उचितानि यानि प्रहरणानि शस्त्राणि तेषां किरणाडम्बरेण प्रभावातिशयेन उड्डामराणि अतिभीषणानि यानि तानि तथा।

अष्टमहाभयापहारानन्तरं संग्रामविजयसामर्थ्यं वक्तुमाह

गर्ज[2]ज्जीमूतमूर्त्ति-चिमदमदनदीबद्धधारान्धकारे
विद्युद्योतायमानप्रहरणकिरणे निष्पतद्दा[3]णवर्षे।

---

१ A. स्रंजि रक्षासि रक्षां। २ A. गर्जत्।
३ B. नितपतद्।

**रुद्धः संग्रामकाले प्रबलभुजबलैर्विद्विषद्भिर्द्विषद्भि[1]-**
**स्त्वद्दत्तोत्साहपुष्टिः प्रसभमरिमहीमेकवीरः पिनष्टि[2] ॥**
**१८ ॥**

॥ १८ ॥ [3]गर्जदित्यादि—

हे संग्रामोत्तारिणि त्वद्दत्तोत्साहपुष्टिः सन् एकवीरः पिनष्टि। एकोऽसहायः यो वीरः सः। त्वया दत्तार्पिता उत्साहस्य[4] वीर्य्यस्य पुष्टिः पोषणं वृद्धिर्यस्य स तथा। प्रसभं हठात् अरिमहीं रिपोर्भूमिं संचूर्णयति। कीदृशः? रुद्धः सर्व्वतो वेष्टितः। कैः? द्विषद्भिः शत्रुभिः विद्विषद्भिः विद्वेषमावहद्भिः। किम्भूतैः? प्रबलानि अत्युद्रिक्तानि भुजानां बलानि शक्तयो येषां तैः। क्व? संग्रामकाले। संग्राममेव प्रावृषा निरूपयति। गर्जन्तो नदन्तो ये जीमूता मेघास्तेषामिव मूर्त्तय[5] आकारा येषां त्रिमदानां त्रिगण्डगलितद्विपानां तेषां या मदनद्यो दाननिर्झरिण्यस्तासु बद्धाः संलग्ना या धारास्ताभिः अन्धकारो दुरालोको यत्र तस्मिन्। किम्भूते? विद्युदिव द्योतायमानः प्रकाशयन् प्रहरणानाम् अस्त्राणां किरणो यत्र तस्मिन् निष्पतन्तो वाणानां वर्षा वृष्टयो यत्र तत्र। एतेन एतदुक्तं संग्रामाङ्गनसङ्गता अपि त्वत्प्रसादात् निस्तरन्तीति भावः।

महाव्याधिशातनशक्तिमाह

---

१ A. द्विषत्भि।　　२ B. पिनक्ति।

३ Orig. omits गर्जदित्यादि।

४ Orig. adds उद्यमन अर्थस्य after उत्साहस्य।

५ Orig. मूर्त्तयो।

पापाचारानुबन्धोद्धतगदविगलत्पूतिपूयास्रविस्र-
त्वङ्मांसा[1]सक्तनाड़ी मुखकुहरचल[2]ज्जन्तुजग्धक्षताङ्गाः।
युष्मत्पादोपसेवागदवरगुटिकाभ्यासभक्तिप्रसक्ता
जायन्ते जातरूपप्रतिनिधिवपुषः पुण्डरीका[3]यताक्षाः॥
१९॥

॥ १९ ॥ पापेत्यादि—

हे वाह्याभ्यन्तरव्याधिव्यथितहृदयानां महौषधे युष्मत्पादोपसेवा तव पदकमलसपर्य्याप्तिः सैव अगदवरगुटिका न विद्यते गदो रोगो यतो वरगुटिकायाः सा तथा सर्व्वरोगापहरि रसायनमित्यर्थः। तत्र योऽभ्यासो नैरन्तर्य्येण सेवनं तत्र भक्त्या श्रद्धया एवमेतन्नान्यथेत्यात्मना प्रसक्ताः संलग्ना ये ते तथा जायन्ते नवीनतनवः प्रादुर्भवन्ति। कीदृशः? जातरूपम् अक्षयकाञ्चनं तत्प्रतिनिधि तत्सदृशं वपुर्येषां ते। पुण्डरीकम् अम्भोजं तद्वदायतमक्षि चक्षुर्येषां ते। पूर्व्वं कीदृशाः? पापानामाचरणम् आचारस्तत्र योऽनुबन्धः अनुगमः नैरन्तर्य्येण सक्तिः तेन उद्धताः प्रकुपिता ये गदा महाव्याधयस्तेभ्यो विगलद् निष्पतद् यत् पूतिपूयास्रं दुर्गन्धपक्वशोणिताक्तरुधिरन्तेन विस्राणि अस्रगन्धीनि यानि त्वङ्मांसानि तेषु आसक्ता निबद्धा या नाड्यः शिरा नाड़ीव्रणानि वा तासां मुखकुहरेषु वदनविवरेषु चलन्तः स्पन्दन्तो जन्तवस्तदुद्भवाः क्रिमयस्तैर्जग्धानि खादितानि क्षतानि च

---

१ A. मान्सा। २ A. गलज्जन्तु। ३ A. पुण्डरीका।

निष्कुषितानि[१] अङ्गानि येषां ते तथा। एवंविधमहाव्याधिग्रस्ता अपि त्वत्पादाराधनमहौषधाद् दिव्यकान्तयो भवन्तीत्यद्भुतम्[२]।

सर्व्वशास्त्रकलाभिज्ञाज्ञानप्रवाहमाह

**विश्रान्तं श्रोत्र[३]पात्रे गुरुभि[४]रुपहृतं यस्य नाम्नायभैक्ष्यं**
**विद्वद्गोष्ठीषु[५] यश्च[६] श्रुतधनविरहान्मूकता[७]मभ्युपैति[८]।**
**सर्व्वालङ्कारभूषाविभवसमुदितं प्राप्य वागीश्वरत्वं**
**सोऽपि त्वद्भक्ति[९]शक्त्या हरति नृपसभे वादिसिंहास-**
**नानि ॥ २० ॥**

॥ २० ॥ विश्रान्तेत्यादि—

हे अप्रतिहतप्रभावविभवे त्वद्भक्तिशक्त्या सोऽपि स एव पुरुषो वादिनां विपन्नानामन्यतीर्थानाम् सिंहासनानि हरति आच्छिद्य गृह्णाति। त्वयि एव या भक्तिरभिप्रसादस्तस्याः शक्त्या सामर्थ्येन उक्तनृपसभे राजसद्मनि नृपाणां सभा नृपसभमिति राजादित्वाद् अदन्तता। किं कृत्वा? वागीश्वरत्वं प्राप्य वाचामैश्वर्य्यमासाद्य। कीदृशम्? सर्व्वे एव अलङ्कारा अशेषा रूपकोपमादयस्तेषां विभवेन शोभासम्पदा समुदितं सम्यगुच्छ्रितं यत् तथा। अथवा सर्व्वालङ्कारभूषया विभवेन च उत्तमलक्ष्म्या समुज्ज्वलम्। पूर्व्वं

---

१ Orig. निःकुषितानि। २ Orig. त्याद्भुतम्।
३ B. श्रोत्र। ४ A. गुरुभिरुद्धृतं। ५ A. विद्यत्गोष्ठेषु।
६ B. यस्य। ७ A. विरहात् मूकता। ८ A. भुपत।
९ A. त्वत्भक्ति।

यस्याम्नायभैक्ष्यं श्रोत्रपात्रे न विश्रान्तम्। आम्नायो गुरुपारम्पर्य्येण उपदेशः। स एव भिक्षार्हत्वाद् भैक्ष्यम्[1]। गुरुभिरुपाध्यायप्रभृतिभिः उपहृतं उपढौकितम्। यस्य य एव मूकताम् अवचनीयताम् अभ्युपेतो गतः, अभ्युपैतीति वा पाठः। कुतः? श्रुतमेव धनं निधिरिव रक्षणीयत्वात् तेन विरहो विच्छेदस्तस्मात्। क्व? विदुषां पण्डितानां गोष्ठीषु सभासु। एतदुक्तं भवति अत्यन्तमूर्खा[2] अपि त्वदालोकनाद् महाविद्वांसो भवन्तीति मतिः।

अत्यन्तदुःखितजनसम्पत्तिदानशक्तिमाह

भूशय्या[3]धूलिधूम्रः स्फुटितकटितटीकर्पटोद्घाटिताङ्गो[4]
यूकायूंषि प्रपिंषन्[5] परपुरपुरतः कर्परे तर्पणार्थी।
त्वामाराध्याध्यवस्यन्[6] वरयुवतिवहच्चामरस्मेरचार्वीम्
उर्वीं धत्ते मदान्धद्विपदशन[7]घनामुद्धृतैकातपत्राम्॥
२१॥

॥ २१ ॥ भूशय्येति—

हे अशरणजनत्राणचूडामणे त्वाम् आराध्य उर्वीं धत्ते। अध्यवस्यन् उद्योगमावहन्। कीदृशीम्? वरयुवतिभिः उत्तमनायिकाभिः वहद् बिभ्रत् चामरं तेन स्मेरा ईषद्धसितवदना चार्वी

---

१ Orig. adds कर्णात् कांशेन संस्थितम्। २ Orig. मूर्षा।
३ A. भूसज्या। ४ कर्पटोत्घाटिताङ्गो। ५ यूकायुंषि प्रपिसन्
६ A, B. ध्यवश्यं। ७ A. दसन।

मनोज्ञा या ताम्। पुनः किम्भूताम्? द्विपानां मत्तकुञ्जराणां दशनैर्घनां दृढ़ां शत्रुभिरकम्प्यत्वात् सान्द्रावपाताम्। उद्धृतम् उद्दण्डीकृत्य आरोपितम् एकम् अद्वितीयम् आतपत्रं रत्नोज्ज्वल-विचित्रछत्रं यत्र ताम्। यः पूर्व्वमेवम् आसीत्। भूरेव शय्या तल्पं तस्या धूलिभिः सङ्करेणुभि[1]र्धूम्रोऽतिमलिनो यः स तथा। किम्भूतः? स्फुटितः अतिजीर्णत्वात्[2] (द्वाविंशतितमेन [3]त्रुटिला साधारसम्पत्तिलाभः) खण्डीभूतः कटितट्यां नितम्बदेशे यः कर्पटो जरद्वसनं तेन उद्घाटितम् व्यक्तीकृतम् अङ्गं देहावयवो यस्य स तथा। पुनः कीदृशः? यूकानां देहोद्भूतजलौकादीनाम् आयूंषि जीवितानि प्रपिंषन् विचूर्णयन्। क्व? परेषां पुरपुरतो गृहाग्रतः कर्परे भग्नभाण्डखण्डे तर्पणार्थी तर्पणम् आत्मनः प्राणधारणार्थं यापना अत्यल्पग्रासमात्रं तदेवार्थः प्रयोजनं यस्य अस्तीति स तथा। इत्थम्भूता अपि राजानो भवन्ति भवत्कृपयेति भावः।

परस्तुत्यानधिकृत्याह—

सेवाकर्म्मान्तशिल्पप्रणयविनिमयोपायपर्य्यायखिन्नाः
प्राग्जन्मोपात्त[4]पुण्योपचितशुभफलं वित्तमप्राप्नुवन्तः।
दैवातिक्रामणीं त्वां कृपण[5]जनजनन्यर्थमभ्यर्थ्य भूयो
भूमेर्निर्वान्तचामीकरनिकरनिधीन्निर्धना[6] प्राप्नुवन्ति ॥ २२ ॥

---

१ Orig. omits ि। २ Orig. त्। ३ Orig. त्रुटित्य।
४ A. जमोपात्त। ५ A. कृपन। ६ A. निधीनिर्धनाः।

॥ २१ ॥ सेवाकर्मेति—

हे कृपणजनजननि त्वामर्थमभ्यर्थ्य धननिमित्तं त्वामाराध्य निर्द्धनाः सम्पद्विकलाः भूयः पुनः प्राप्नुवन्ति। कान्? भूमेः पृथिव्याः सकाशाद् निर्यान्ता उद्गीर्णाश्चामीकराणां सुवर्णानां निकराः समूहा यैर्निधिभिस्तान् आसादयन्ति। कीदृशीम्? दैवं नियतवेदनीयं कर्म्म शुभम् अशुभं च तदप्यतिक्रामति उल्लङ्घयति या ताम्। पूर्व्वं कीदृशाः? वित्तं धनम् अप्राप्नुवन्तोऽलभमानाः। किम्भूतम्? प्राग्जन्मनि[1] उपात्तम् उपार्ज्जितं यत् पुण्यं कुशलं तस्मादुपचितम् अतिशयीभूतम् इह जन्मनि यच्छुभं तन्निष्यन्दीभूतं स्वचरितं तस्य फलं प्रसवो यत्र तत् तथा। किंविशिष्टाः? सेवा प्रेष्यीभूय पराराधनं, कर्म्मान्तः कृषिकर्म्म, शिल्पं चित्रादिविद्या, प्रणयो याञ्चा, विनिमयः परिवर्त्तनं[2] क्रयविक्रयलक्षणम्,[3] उपाय उपागतिः परानुगमः, अमीषां पर्य्यायाः प्रकारास्तैः खिन्ना आयासिता ये ते तथा। भाग्यहीना अपि परमसम्पदं भजन्ते तव पदसरसिजसेवया इत्याशयः।

अगतिकानामपि ऐश्वर्य्यप्रदानप्रभावमभिधत्ते

**वृत्तिच्छेदे विलक्षः क्षतनिवसनया[4] भार्य्यया भर्त्स्यमानो[5]**
**दूरादात्मम्भरित्वात्[6] स्वजनसुतसुहृद्बन्धुभिर्वर्ज्ज्यमानः।**

---

१ Orig. प्राजन्मनि।　२ Orig. परिवर्त्तनः।　३ Orig. लक्षणः।
४ A. निवसनयाः।　५ A, B. भत्स्यमानो।　६ A. omits त्।

त्वय्यावेद्य स्वदुःखं तुरगखुरमुखोत्खातसीम्नां गृहाणा-
मीष्टे स्वान्तःपुरस्त्रीवलयरणरणाजातनिद्राप्रबोधः ॥
२३ ॥

॥ २३ ॥ वृत्तिच्छेद इति—

हे दीनानुकम्पिनि त्वयि आवेद्य स्वदुःखं गृहाणामीष्टे। त्वयि परदुःखासहिष्णौ स्वीयं यद्दुःखम् असुखं तद् आवेद्य विज्ञाप्य[1] गृहाणां महाप्रासादेषु ईष्टे रमते परमेश्वरो भवतीत्यर्थः। षष्ठी-सप्तम्योरर्थं प्रत्यभेदात्[2] षष्ठ्या निर्द्देशः। कीदृशानाम्? तुरगाणाम्[3] अश्वानां खुरमुखानि नखाग्रभागास्तैरुत्खाताः क्षुण्णाः सीमानो मर्य्यादाभूमयो येषु तेषाम्। कीदृशः सन्? स्वस्य आत्मनोऽन्तः-पुरेषु कोष्ठकवेश्मसु यः स्त्रीवलयाः [4]स्त्रियो योषितस्तासां ये वलयाः कङ्कणास्तेषां रणरणारवेण जात उत्पन्नो निद्रायाः स्वापात् प्रबोधो ज्ञानं यस्य स तथा। रणरणेति शब्दानुकरणम्। प्रागासीत् कीदृशः? वृत्तिर्वर्त्तनम् आजीविका तस्याश्छेदः खण्डनं तस्मिन् सति विलक्षः विगतं लक्षणमिव लक्ष्यं गम्यस्थानं यस्य सः अप्रति-पत्तिमान् [5]वैलक्ष्ययुक्त इत्यर्थः। किम्भूतः? क्षतम् अत्यन्तस्फुटितं निवसनम् आवरणवस्त्रं यस्यास्तया भार्य्यया पत्न्या [6]भर्त्स्यमानः विगृह्यमाणः। किं विशिष्टः? दूरादेव उद्वीक्ष्य वर्ज्यमानो निषिध्य-

---

१ Orig. विज्ञप्य। २ Orig. अर्थप्रत्यभेदात्।
३ Orig. तुरगाना। ४ Orig. omits यो।
५ Orig. वेलक्ष्य। ६ Orig. भर्त्स्यमानः।

मानः। कुतः ? आत्मानमेव केवलं बिभर्त्तीत्यात्मम्भरिस्तस्य भावस्तत्त्वं तस्मात्। स्वजनाः पूर्व्वोपकृतसेवकाः सुताः पुत्राः सुहृदो विश्वासिनः प्रिया बन्धवो मित्राणि तैः। एवं दुर्गतिरपि[1] महदैश्वर्य्यमुपार्ज्जयति त्वच्चरणमणिकिरणाङ्कितसरोरुहचिन्तयेति।

तत्र चक्रवर्त्तित्वमपि नातिदुर्लभं त्वद्भक्तेषु इति दर्शयन्नाह

चक्रं दिक्चक्रचुम्बि[2] स्फुरदुरुकिरणा लक्षणालंकृता स्त्री
षड्[3]दन्तो दन्तिमुख्यः[4] शिखिगलरुचिरश्यामरोमा[5] वराश्वः।
भास्वद्[6] भास्वन्मयूखो मणिरमलगुणः कोषभृत् पूर्णकोषः
सेनानीर्वीरसैन्यो भवति भगवति[7] त्वत्प्रसादांशलेशात् ॥ २४ ॥

॥ २४ ॥ चक्रेत्यादि—

हे भगवति तव यः प्रसादो बलं तस्य अंशलेशोऽत्यल्पीयान् भागस्तस्माद् भवति एतत्सर्व्वमिहोच्यते। चक्रं दिशां चक्रं समूहस्तच्चुम्बितुमास्प्रष्टुं शीलं यस्य तत्। स्फुरन्तो जाज्वल्यमाना उरवो महान्तः किरणा दीप्तयो यस्याः सा तथा। स्त्रीरत्नलक्षणैश्चिह्नैः अलङ्कृता भूषिता या सा। दन्तिमुख्यो दन्तिनां नागानाम् अग्रणीः।

१ Orig. दुर्गतेरपि। २ A. चंबि। ३ A. षट्। ४ A. omits :। ५ A. गलकरुचिस्यामरोमा। ६ A. भास्वत्। ७ B. भगवती।

षट् दन्ता विषाणा विद्यन्ते यस्य सः। वराश्वः उत्तमतुरङ्गः। शिखिनां मयूराणां ये गलरुचकाः कण्ठचन्द्रकास्तद्वत् श्यामानि रोमाणि यस्य सः स्फुरदिन्द्रनीलनिभ इत्यर्थः। शिखिगलरुचिरेति पाठे शिखिकण्ठवद् रुचिराणि मनोहराणीति योज्यम्, शिखिगलरुचिरिव श्यामानीति वा। मणिः भास्वन्तो देदीप्यमानाः भास्वतो रवेरिव मयूखा कान्तयो यस्य स तथा। अमला विषाद्यपहरणा गुणा यस्य सः। कोषभृत् भाण्डागाराध्यक्षः पूर्णकोषोऽक्षया निधयो यस्य सः। सेनानीः सेनायाः समूहः सैन्यं वीराणां सैन्यं यस्य सः। एतदुक्तं स्यात् अपरिमितजन्मोपचितोत्तमसुचरितशतसाध्यमपि चतुर्द्वीपाधिपत्यं त्वदाराधनान्तरांशेन उपजायते नृणामिति भावः।

अष्टमहासिद्धिदानसामर्थ्यमाह

**स्वच्छन्दं चन्दनाम्भः[1]सुरभिमणिशिलादत्तसङ्केतकान्तः**
**कान्ताक्रीड़ानुरागादभिनवरचितातिथ्यतथ्योपचारः।**
**त्वद्विद्यालब्धसिद्धिर्मलयमधुवनं याति विद्याधरेन्द्रः**
**खड्गांशु[2]श्यामपीनोन्नतभुजपरिघ[3]प्रोल्लसत्पारिहार्य्यः[4]॥**
**२५॥**

॥ २५ ॥ स्वच्छन्दमिति—

हे सुगतमातः त्वद्विद्या तव विद्या धारणीमन्त्रादिस्तया लब्धा

---

१ A. स्वच्छन्दश्चन्दनांभः। २ A. खंगांशु।
३ A. puts : after परिघ। ४ A. omits : after पारिहार्य्य।

सिद्धिर्येन स पुमान् विद्याधराणाम् इन्द्रः अधिपतिः सन् याति । मलयस्य चन्दनाद्रेर्मधौ वसन्तसमये यद् वनं क्रीड़ोद्यानं ततो व्रजति सफलीकरोतीत्यर्थः । स्वच्छन्दम् अप्रतिहतप्रभावं यथा स्यात् । कीदृशः ? खड्गांशुभिः कृपाणमरीचिभिः श्यामः स्फुरदीषदभिनीलः पीनो[1] मांसल उन्नतः प्रलम्बो यो भुजः स एव परिघः परिघ इव वा बाहुदण्डस्तत्र प्रोल्लसत् प्रस्फूर्जत्[2] पारिहार्य्यं[3] यस्य सः । किम्भूतः ? चन्दनाम्भोभिः सुरभिः सुगन्धिर्या मणेर्माणिक्यस्य[4] शिला तत्र दत्तः सङ्केतः कान्ताभिर्यस्य सः । तत्र गन्तव्यं त्वयेत्यादि वचनम् अनुक्त्वैव यच्चक्षुर्व्वक्रकरादिसंज्ञया तदर्थावबोधः संज्ञानं स सङ्केत इत्युच्यते । अभिनवं नवीनम् अपूर्व्वं रचितम् उत्पादितं यद् आतिथ्यम् आतिथेयं अतिथेरर्हत्वात् तेन तथ्येन अकपटेन उपचरणमुपचारः परिचर्य्या यस्य स तथा । अथवा अभिनवरचितम्[5] आतिथ्यस्य अतिथिसत्कारस्य तथ्यः यथार्थ उपचारो यस्य स इति । कुतः ? कान्तस्य स्वामिन आ समन्ततो या क्रीड़ा केलिस्तस्य अनुरागः अभिषङ्गो यस्तस्मात् । कान्तानां कान्ताभि[6]र्यः क्रीड़ायामनुरागस्तस्मादिति ग्राह्यम् । दिव्यसम्पत्तेरपि नातिदूरता त्वच्चरणपङ्कजपरागधूसरीकृतोत्तमाङ्गानामिति भावः ।

धनविहारमभिधाय सर्व्वजनसौभाग्यं प्रकाशयन्नाह

---

१ Orig. पीतो ।
२ Orig. omits त् ।
३ Orig. परिहार्य्यं ।
४ Orig. माणिकस्य ।
५ Orig. omits म् ।
६ Orig. adds र्ता ।

हाराक्रान्तस्तनान्ताः श्रवणकुवलयस्पर्द्धमानायताक्ष्यो
मन्दारोदारवेणीतरुणपरिमलामोदमाद्यद्[1] द्विरेफाः।
काञ्चीनादानुबन्धोद्धत[2]तरचरणोदारमञ्जीरतूर्य्या-
स्त्वन्नाथान् प्रार्थयन्ते स्मरमदमुदिताः सादरा देव-
कन्याः[3] ॥ २६ ॥

॥ २६ ॥ हारेत्यादि—

हे अनवद्याङ्गि त्वन्नाथान् प्रार्थयन्ते त्वमेव नाथा स्वामिनी येषां तान्, सादराः ससम्भ्रमाः सत्यः अभ्यर्थयन्ते, देवाङ्गनाभिरुपेत्य अभ्यर्थ्यन्ते[4] उत्पत्य परिभुज्यन्ते[5] इत्यर्थः। काः? देवकन्याः स्वर्गाङ्गनाः, स्मरमदेन मन्मथदर्पेण मुदिता अतिहर्षेण उच्छृङ्खलीकृता यास्ताः। हारेण आक्रान्तः रुच्छन्नः स्तनयोरन्तः अन्तरालं यासां ताः। श्रवणयोर्यत् कुवलयम् इन्दीवरं तत्स्पर्द्धमाने अभिमानजन्यमाने आयते विशाले अक्षिणी चक्षुषी यासां ताः। किम्भूताः? मन्दारेण पारिजातेन उदारा महती वेणी आयतकेशविन्यासस्तस्याः तरुणः अतिपुष्टः परिमलोऽतिसुरभिगन्धस्तस्य आमोदेन[6] आघ्राणेन माद्यन्तो हृष्यन्तो द्विरेफा भृङ्गा यासां ताः। पुनः किम्भूताः? काञ्चीनादस्य रसनाध्वनेः अनुबन्धः अनुगमो यस्तेन उद्धततरौ अधीरौ चरणयोरुदारौ विपुलौ मञ्जीरौ नूपुरौ तावेव तूर्य्यौ

---

१ A. मोद्यमाद्य। २ A. बद्धाद्धत।
३ A. omits :। ४ Orig. अभ्यर्थते।
५ Orig. परिभजते। ६ Orig. आमदेन।

मुरजौ यासां ताः उद्धततरयोरत्यन्तचपलयोश्चरणयोरिति वा व्याख्या । त्वत्पदाधिष्ठितानां सकलमेव अवश्यं वश्यमिति भावः ।

वनविहारं पुनराह

रत्नच्छन्नान्तवापीकनककमलिनीवज्रकिञ्जल्कमाला-
[1]मुन्मज्जत्पारिजातद्रुममधुपवधूद्धूतधूलीवितानाम्[2] ।
वीणावेणुप्रवीणामरपुररमणीदत्तमाधुर्य्यतूर्य्यां[3]
कृत्वा युष्मत्सपर्य्यामनुभवति चिरं नन्दनोद्यानयात्राम्
॥ २७ ॥

॥ २७ ॥ रत्नेति—

हे निर्म्मलीकृतस्वान्तसन्तते युष्मत्सपर्य्यां कृत्वा तव पदस्य पूजां विधाय अनुभवति चिरम् अनल्पकल्पं नन्दनाभिधानस्य उद्यानस्य यात्राम् उत्सवम् उपभुङ्क्ते। कीदृशीम् ? रत्नैर्वैदूर्य्यादिभिश्छन्नो व्याप्तोऽन्तः परिसरो यासां तासु वापीषु क्रीड़ापुष्करिणीषु याः[4] कनककमलिन्यः काञ्चननलिन्यस्तासां वज्राणां हीराणां ये किञ्जल्काः केशरास्तेषां माला यत्र ताम् । उन्मज्जन्त ईषद्विकसन्तो मञ्जरिता ये पारिजातद्रुमा मन्दारतरवस्तेषु मधुपवधूभिः भृङ्गाङ्गनाभिः[5] धूताः समुत्तोलिता ऊर्द्ध्वं नीता या धूल्यः परागास्ता एव वितानानि चन्द्रातपा यस्यां ताम् । मधुरमधूद्धूतेतिपाठे उन्मज्जत्पारिजातद्रुमाणां मधुरेण मनोहरेण मधुना वसन्तेन

१ A. मुन्मत्जत् ।  २ A. मधुरमधूद्धूतधूलीवितानाम् ।
३ B. तूर्य्या  ४ Orig. omits : ।  ५ Orig. omits : ।

उद्भूतधूलीवितानां मधुरं मन्दं कान्तं वा क्लेति वा व्याख्या। मधुरमन्दमन्दाकिनीक्रीड़ार्थात् पतद्भिरेव मधुभिर्मकरन्दबिन्दुभिरुद्भूतधूलीवितानामिति नीरसा व्याख्या। किम्भूताम्? वीणा-वेणुषु वल्लकीवंशेषु प्रवीणा:[1] अमरपुररमण्य: सुरनगरसुन्दर्य्यस्ताभिर्दत्ता: प्रहता माधुर्य्येण मनोज्ञतया तूर्य्या मुरजा यस्यां ताम्। दत्तमिति दोऽवखण्डने इति धातो: प्रयोग:[2]। त्वत्प्रणता: सुरपुङ्गवा भवन्तीति भाव:।

जलक्रीड़ाविहारमाह

**कर्पूरैलालवङ्गत्वगगुरुनरद[3]क्षोदगन्धोदकायां**
**कान्ताकन्दर्पदर्पोत्कटकुचकुहरावर्त्तविश्रान्तवीच्याम्।**
**मन्दाकिन्याममन्दच्छट[4]सलिल[5]सरित्क्रीड़या सुन्दरीभि:**
**क्रीड़न्ति त्वद्गतान्त:[6]करणपरिणतोत्तमपुण्यप्रभावा:॥**
**२८॥**

॥२८॥ कर्पूरेत्यादि—

हे अद्वैततत्त्वावबोधदायिनि त्वय्येव गतं यदन्त:करणम् अन्त-

---

१ Orig. सुरवीणाया:।

२ दोऽवखण्डने इति धातोर्दत्त इति पदं कथमपि भवितुं नार्हति यत: "दोषोमास्थां ङिस्त्यतौ"-इत्यनेन दितएव भवति। अतएवात्र दोऽवखण्डने धातो: प्रयोग इति प्रामादिक: पाठ:। वस्तुतस्तु दाल लूनौ-इति धातो 'दद्दोऽध:'-इत्यनेन ददादेशात् दत्त इति पदं जातम् इति निष्कर्ष:। ३ A. नलद।

४ A. मन्दाच्छट। ५ A. मुलिल। ६ A. त्वद्गतान्त:।

रात्मा मानसेन्द्रियं वा तस्मात् परिणताः स्थिरीभूताः उत्तप्ताः प्रदीप्ताः पुण्यानां प्रभावाः शक्तयो[1] येषां ते क्रीड़न्ति रमन्ते। अमन्दा अधीरा छटा जलपातध्वनिर्येषु सलिलेषु ते र्या सरित्-क्रीड़ा जलकेलिस्तया। अथवामन्दच्छटा सलिलानां सरतीति सरित् प्रसार इतस्ततो गमनं यस्यां तया। अथवा सरित्क्रीडेत्येतावान् संज्ञाशब्दो जलक्रीडेत्यस्मिन्नर्थे वाच्यः। काभिः? सुरसुन्दरीभिः दिव्याङ्गनाभिः। कस्याम्? मन्दाकिन्याम् सुरदीर्घिकायाम्। कर्पूर एलालवङ्गस्त्वक् अगुरुर्नलदो मांसी। अमीषां चोदगन्धाश्चूर्णवासास्तन्मिश्राणि तद्वासितानि वा उदकानि यत्र तस्याम्। किम्भूतायाम्? कान्तानां रमणीनां कन्दर्पदर्पेण मदनमदेन उत्कटाः प्रव्यक्ता ये कुचाः पयोधरास्तेषां कुहरेषु आवर्त्तेन[2] अम्भसां भ्रमेण विश्रान्ता मुहूर्त्तं विलम्बिता वीचयस्तरङ्गा यत्र तस्याम्। त्वत्पादाब्जपूतानां न किञ्चिदप्यतिदुर्लभमिति भावः।

परमैश्वर्य्यमपि त्वदवलोकनमात्रया साध्यमित्युपदर्शयन् आह

गीर्व्वाणग्रामणीभिर्विनयभरनमन्मौ[3]लिभिर्वन्दिताङ्घ्रिः
स्वर्गोत्सङ्गेऽधिरूढ़ः सुरकरिणि रण[4]द्भूषणोद्भा[5]सिताङ्गे।
शच्या[6]दोर्दामदोलाविरलवलयितोद्दाम[7]रोमाञ्चमूर्त्तिः
पूतस्त्वद्दृष्टि[8]पातैरवति सुरमहीं हीरभिन्नप्रकोष्ठः॥ २९॥

---

१ Orig. adds शक्रत्वलाभं। २ Orig. आवर्त्तेन।
३ A. ग्रामन्मौ। ४ A. रणत्। ५ A. भूषणोत्।
६ A. शच्या। ७ A. वलयतोद्दाम। ८ A. त्वत्दृष्टि।

॥ २९ ॥ गीर्वाणेत्यादि—

हे अपरिमितोत्तमपदवरदे त्वद्दृष्टिपातैः पूतः तव दृष्टेः पाता अव[1]लोकनानि तैः पवित्रीकृतः सुराणां देवानां महीं वसुन्धराम् अवति परिपालयति। कीदृशः? हीरैः वज्रमणिभिः भिन्नः प्रस्फुटीकृतः प्रकोष्ठः कफोणिस्कन्धयोरन्तरालं यस्य सः। किम्भूतः? वन्दिता शिरसि कृता आज्ञा शासनं यस्य सः। कैः? गीर्वाणानां ग्रामणीभिः सुराणां प्रधानैः विनयभरेण भक्तिभारेण नमन्त्यो नम्रीभवन्त्यो मौलयः किरीटा येषां तैः। क्व? स्वर्गस्य त्रिदशालयस्य उत्सङ्गे अभ्यन्तरे। पुनः किम्भूतः? अधिरूढोऽतिवाह्य स्थितः। क्व? सुरकरिणि ऐरावतस्कन्धे। रणद्भूषणैः रणरणायमानालङ्कारैर्भूषितं प्रसाधनीकृतम् अङ्गं यस्य तस्मिन्। शच्या इन्द्राण्या दोषोर्भुजयोर्दामदोला पाशलता तावेव वा दामदोला तया अविरलं निरन्तरं वलयितं परिवेष्टितमालिङ्गितमित्यर्थः यत् तेनोद्दामरोमाञ्चाः प्रव्यक्तीभूतोत्फुल्लतनुरुहा मूर्त्तौ यस्य सः। देवाधिपत्यमपि त्वदवलोकनमात्रलभ्यं किमन्यत्पदमिति भावः।

लौकिकसम्पद्दानशक्तिमभिधाय इदानीं लोकोत्तरानुत्तरसुखदायिनं मूर्त्तिभेदं श्लोकचतुष्टयेन उद्भावयन्नाह

**चूड़ारत्नावतंसा[2]सनगतसुगतव्योमलक्ष्मीवितानं**
**प्रोद्यद्बालार्ककोटीपटुतरकिरणापूर्य्यमाण[3] त्रिलोकम्।**

---

[1] Orig. repeats त्वद्दृष्टेरव।

[2] A, B. वतंशा।

[3] A. पूर्य्यमान।

प्रौढालीढैकपादक्रमभरविनमद्ब्रह्मरुद्रेन्द्रविष्णु
त्वद्रूपं भाव्यमानं भवति भवभयोच्छित्तये जन्मभाजाम्
॥ ३० ॥

॥ ३० ॥ चूड़ारत्नेति—

हे मायाजालाभिसम्बोधिलाभिनि त्वद्रूपं भाव्यमानं तव मूर्त्ति-र्वि[1]चिन्त्यमाना जन्मिनां लोकानां भवभयानि संसारसन्त्रासास्तेषाम् उच्छित्तये समुन्मूलनाय[2] भवति सम्पद्यते । किम्भूतम् ? चूड़ारत्नानां शिखास्थितमाणिक्यानाम् अवतंसाः शेखरास्त एव आसनानि विष्टराः तेषु गता अवस्थिता ये सुगता अक्षोभ्यादयस्तेषां व्योम्नि नभस्तले या लक्ष्मीः शोभा सैव वितानं यत्र तत् । अथवा त एव व्योम्न आकाशस्य लक्ष्म्यः श्रिय इव वितानानि यत्र तदिति । प्रोद्यन्त उद्गच्छन्तो ये बालार्का उदयगिरिशिरःस्थिता दिनमणयस्तेषां कोट्यो[3] लक्षशतानि तेषां पटुतराः अत्युष्ण[4]तराः किरणास्तेजांसि तैरापूर्य्यमाणं आ समन्तात् व्याप्यमानं त्रिलोकं भुवनत्रयं येन तत् । प्रौढः साटोपो य आलीढेन वामसङ्कोचनेनैक-पादक्रमः पदविन्यासः पदशक्तिर्वा तस्य भरेण आक्रमणेन निष्पीड़नेन विनमन्त आनम्रीभवन्तो ब्रह्मरुद्रेन्द्रविष्णवो यत्र तत् । अनेन निर्माणकायः कथित इति भावः ।

पुनर्मूर्त्तिप्रकारमाह

---

१ Orig. omits ि ।  २ Orig. सन्मूलनाय ।
३ Orig. कोट्यौ ।  ४ Orig. omits अ in अत्युष्ण ।

पश्यन्त्येके सकोपं[१] प्रहरणकिरणोद्गूर्ण[२]दोर्दण्डखण्ड[३]-
व्याप्तव्योमान्तरालं वलयफणिफणादारुणाहार्य्यचर्य्यम्।
द्विष्टव्युत्[४]चासिहासोड्डमरडमरुको[५]ड्डामरास्फालवेला
[६]वेतालोत्तालतालप्रमदमदमहाकेलिकोलाहलो[७]ग्रम्॥
३१॥

॥ ३१॥ पश्यन्त्येकेति—

पश्यन्ति एके योगिनः तद्रूपं व्यवलोकयन्तीति पूर्व्वेण सम्बन्धः। कीदृशम्? सकोपं सक्रोधम्। प्रहरणकिरणैः आयुधमयूखैः उद्गूर्णाः प्रभास्वराः सन्त ऊर्द्धम् उल्लासिता ये दोर्दण्डखण्डा बाहुदण्ड-कटकास्तैर्व्याप्तं छन्नं व्योम्नोऽन्तरालम् अभ्यन्तरं येन तत्। वलयीभूता ये फणिनस्तक्षकाद्या नागाधिपतयस्तेषां फणा[८]स्ताभिः दारुणा अतिरौद्रा अहार्य्या अस्थिरा चर्य्या चरितं यस्य तत्। द्विष्टानां[९] चतुर्मारादिरिपूणां व्युत्त्रासिनोऽतिभयङ्करा ये हासा विकटोच्चप्रहसनानि तैः उड्डमरा अत्युत्कटा ये डमरुकाः क्षपोटा-स्तेषाम् उड्डामरोऽनाकुलो य आस्फालो हननाटो यस्तस्य या वेला समयस्तत्र ये वेतालाः प्रेतविशेषास्तेषाम् उत्ताला अत्युच्च-तरा ये तालाः करयोरास्फोटास्तैः प्रमदेन अतिहर्षेण यो

---

१ A. पश्यं ते केशकोपं। २ A. किरणोत्गूर्ण।
३ A. षण्ड। ४ A. omits त्। ५ A. हासो डमर डमरुको।
६ A. omits वेता। ७ A. omits लो।
८ Orig. फटा। ९ Orig. द्विषाणां

मदो दर्पस्तेन या महाकेलयोऽत्युद्भटविलासास्तेषां कोलाहलेन अतिकलकलेन उग्रम् अतिभीषणं यत् तत् । तत्र एवंविधं रूपं विभावितो योगिनोऽचिरेणैव सिध्यन्तीति भावः ।

पुनरपि मूर्त्तिभेदमाह

केचित् त्वेकैकरोमोद्गमगतगगनाभोगभूभूतलस्थ-
स्वस्थ[1]ब्रह्मेन्द्ररुद्रप्रभृतिनरमरुत्सिद्ध[2] गन्धर्व्वनागम् ।
दिक्चक्राक्रामि[3]धामस्थितसुगतशतानन्तनिर्म्माणचित्रं
चित्रं त्रैलोक्यवन्द्यं स्थिरचर[4]रचिताशेषभावस्वभावम् ॥
३२ ॥

॥ ३२ ॥ केचिदिति—

केचिद्भावुकास्त्वद्रूपं ध्यायन्ति । किम्भूतम् ? त्रैलोक्यानां कामरूपारूप्यधातूनां वन्द्यं नमस्यम् । स्थिराः पृथिव्यादयो भाजनरूपा लोकाश्चरा देवादयः सत्त्वलोकाश्च एतत्प्रभृतीनां रचितो निष्पादितोऽशेषाणाम् अपर्य्यन्तानां भावः स्वभावो येन तत् । एतेन उत्पादस्थितिप्रलयकारिणी त्वं संवृत्तेति भावः । अथवा स्थिरचररचिता अशेषा ये भावास्त एव स्वभावः सर्व्वशून्यता प्रभास्वरं त्वद्रूपं परमार्थत इति वा व्याख्या । एतेन धर्म्मकायोऽभिहितः । चित्रम् अनुपमं पृथग्[5]जनश्रावकाद्यवेद्यं महाबोधिसत्त्वानामेव परं गम्यमनेन सम्भोगकायः प्रतिपादितः । विशेषणद्वयेन निर्म्माण-

---

१ स्वस्थः would harmonise with the Tibetan version.

२ B. सिद्ध । ३ A. क्राम । ४ Orig. तर । ५ Orig. पृथक ।

कायमाह। एकैकरोम्णां प्रतितनूरुहाणाम् उद्गमे जन्मस्थाने गतेषु अवस्थितेषु गगनमिव आभोगः परिणाहो विस्तारो यस्तद्-द्भूम्यां स्थानम् अवकाशो येषु भूतलेषु तत्रस्थाः स्वस्था निरुपद्रुता ब्रह्मेन्द्रोपेन्द्ररुद्रप्रभृतय एवमाद्या नरमरुत्सिद्धगन्धर्व्वनागा यस्य तत्। प्रतिरोमकूपं चातुर्द्वीपकं निर्म्मितमिति भावः। दिक्चक्रा-क्रामिषु दशदिग्यादिलोकधातुसमुहव्यापिषु धामसु तेजःसु स्थित-सुगतानां निषण्णानेकतथागतसहस्राणामनन्तं संख्यातिक्रान्तं यन्नि-र्म्माणं सत्त्वाधिमुक्तिभेदेन अनेकं रूपं तेन चित्रं मनोरमं यत् तत्।

मतभेदेन पुनर्निर्म्माणकायप्रकारमाह

**लाक्षासिन्दूररागारुणतरकिरणादित्यलौहित्य[1]मेके**
**श्रीमत्सान्द्रेन्द्र[2]नीलोत्पलदलित[3]दलक्षोदनीलं तथान्ये।**
**क्षीराब्धिक्षुब्धदुग्धाधिकत[4]रधवलं काञ्चनाभं च केचित्**
**त्वद्रूपं विश्वरूपं स्फटिकवदुपधायुक्तिभेदाद्विभिन्नम्॥ ३३॥**

॥ ३३ ॥ लाक्षेति—

एके पुनर्योगिनः त्वद्रूपम् आकलयन्ति। लाक्षासिन्दूरयोर्यो रागस्तद्वदरुणतरकिरणोऽत्यन्तरक्तरुचिर्य आदित्यस्तद्वत् लौहित्यं यस्य तत्। किम्भूतम्? श्रीमत् श्रीर्लौकिकलोकोत्तरा सम्पत् सा विद्यते यस्मिन् यस्य वा तत्। सान्द्रो निविडो नीलोत्पलस्य दन्द्र-

१ A. लोहित्य २ B. सान्द्रन्द्र। ३ A. दलदलित ४ A. चिक्क।

नीलमणेर्दलितः पृथक् पृथक् कृतो यो दलः खण्डस्तस्य चोदः तद्व-
न्नीलं यत् तत्। स्फुरदिन्द्रनीलचूर्णप्रभमित्यर्थः। क्षीराब्धेः क्षुब्धम्
आवर्त्तनतया फेनिलं यत्[१] दुग्धं ततोऽपि अधिकतरं सातिरेकतमं
धवलम् अतिशुभ्रं तदेवंविधम् अपरे साधका जानन्ति। काञ्च-
नाभं च उत्तप्तचामीकरप्रभम्। केचिद् भावुकाः। अतो मात-
स्तावकं रूपं विश्वम् एकं रूपम् आकारो यत्र तत्। किंवत्?
स्फटिकवदतिविमलाकोपल इव एकमपि भिन्नम् अनन्तप्रकारम्।
कुतः? उपधाभक्तिभेदात् उपधा नीलरक्ताद्युपाधिविशेषस्तस्या
भक्तिर्भजनं युक्तिर्वा योजनं तस्या भेदो नानात्वं तस्मात्। परमा-
र्थतः त्वमद्वयरूपापि अपरिमेयजनमनोविकल्पप्रभावाद् अपरि-
मिताकारा प्रतिभाससे[२] इति भावः।

भवममामसुखसम्पद्दानसामर्थ्यदृष्टान्तमुदीर्य्य इदानीं स्वमौ-
ढ्यत्यमाश्चर्य्यं च परिहरन्नाह

सार्व्वज्ञ[३]ज्ञानदीपप्रकटितसकल[४]ज्ञेय तत्त्वै[५]कसाक्षी
साक्षाद्वेत्ति[६] त्वदीयां गुणगणगणनां सर्व्ववित् तत्‌त्वतो वा।
यत्तु व्यादाय वक्त्रं बलिभुजरटितं मादृशो रारटीति
व्याप[७]त्सा तीव्रदुःख[८]ज्वरजनितरुजश्चेतसो हास्य[९]हेतुः॥
३४॥

१ Orig. फेनिलयं। २ Orig. प्रतिभासते। ३ B. सार्वज्ञ।
४ A. सकले। ५ A. तत्वैक। ६ A. वेति।
